
# Celebrating Hindi Day (14-09-2016)

Shree Somnath Sanskrit University celebrated the Hindi Day on 14th September 2016. Students chanted many poems of Hindi Literature. Teachers also explained the importance of Hindi Language in different ways. Students learned the fact that “Along with the knowledge of Regional Languages, knowledge of Hindi Language is also very important”.



**श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवने समायोजितः विश्व-हिन्दी- दिवसः**

१४/९/२०१६ दिनाङ्के विश्वविद्यालये विश्वहिन्दीदिवसः समायोजितः । कार्यक्रमेऽस्मिन् विद्यार्थिनः नैकेषां प्रसिद्धानां हिन्दीसाहित्यिकानां कृतिं परिचायितवन्तः काव्यपाठं च कृतवन्तः। तस्य विश्वविद्यालयस्य अध्यापकाः अपि नैकधा हिन्दीभाषायाः माहात्मयम् अगायन् । कार्यक्रमेऽस्मिन् मुख्यवक्तृत्वम् ऊढवान् डो. शत्रुघ्नः पाणिग्राही । सः हिन्दीभाषायाः सरलतां बोधयन् काश्चित् स्वरचिताः पङ्क्तीः अश्रावयत् । कार्यक्रमान्ते आध्यक्ष्यं वहता व्याकरणविदा अनुस्नातकविभागाध्यक्षेण प्रो. विनोदकुमारझा - महाभागेन हिन्दी-भाषाश्रयणेन नैके कलाकाराः नैकाः कृतयश्च कथं सर्वजनादरं लेभिरे इति सुष्ठु प्रतिपादितम् । भारतीयैः सर्वाः अपि भारतीयभाषाः समादरणीयाः, किन्तु प्रादेशिकभाषाज्ञानेन सममेव भारतीयैः अस्माभिः हिन्दीज्ञानमवश्यमेव सम्पादनीयं, येन भारतस्य प्रत्येकं कोणे अस्माकं सञ्चरः सुकरः भवेत् इति तेन उक्तम् ।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 14, page no. 12)

